**International Journal of Research in Social Sciences**
Vol. 9, Issue 6, June - 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# अर्थवादः

डॉ सत्यव्रत मिश्रः सहकारी शिक्षकः
बलाङ्गीरम्, ओाडिशा अनुसन्धाता(भू.पू)अद्वैतवेदान्ताविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः

अर्थवादनिरूपणे किं तत्र तन्त्रमित्युक्तौ "तत्र प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनं एव अर्थवादः"। इत्युक्तं भवति। यद्यत्र एकत्र प्रशंसनं भवति तर्हि निन्दनन्तु स्पष्टं ज्ञायत एव। तावता एकस्य उत्कर्षकथनात् अपरस्य अपकर्षः सिद्धयति इति मत्वा निन्दनप्रशंसनमुभयं हि अर्थवादः इति। अनुसन्धात्रा तत्सूचकाः केचन मन्त्राः विनिश्चिताः सन्ति। ईशावास्योपनिषत्प्रभृति बृहदारण्यकोपनिषत्पर्यन्तं सर्वत्रापि श्रुतिषु अर्थवादाख्यमिदं तात्पर्यलिङ्गं द्रष्टं सुलभमेवास्ति। ते चामी मन्त्राः क्रमशः उपलब्धिस्थानपूर्वकाः समुल्लिख्यन्ते संसूच्यन्ते च। तद्यथेह ईशावास्योपनिषदि तृतीयमन्त्रे - 'असूर्या नाम ते श्लोकाः अन्धेन तमसावृताः"। इत्यनेन आत्मघातिनां निन्दनेन आत्मविदः प्रशंसनं कृतम्। तस्माच्चात्र अर्थवादः समुदाहृतः। तथैव केनोपनिषदि तृतीयखण्डे 'ब्रह्म ह देवेभ्य विजिग्ये तस्य ह ब्रह्मणो विजज्ञ"े इत्यत्र।

किं बहुना अस्यामेव उपनिषदि चतुर्थखण्डे द्वितीयमन्त्रे 'तस्माद्वा एते देवा" इत्यत्र अर्थवादः संसूचितो वर्त्तते। तथैव कठोपनिषदि स्वर्गलोकप्रशंसनाय तत्र अर्थवादः दृष्टः। तद्यथा - 'स्वर्गे लोके भयं किञ्चनास्ति" इत्येतस्मिन्मन्त्रे शोकातिगस्य मोदनात् अर्थवादः सूच्यते।

पुनश्च 'श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ साम्परीत्य विवनक्ति धीरः" इति 'अविद्यामन्त्रे वर्त्तमानाः" इत्यत्र च मन्त्रद्वयेऽपि अर्थवादः सूचितो वर्त्तते।

प्रश्नोपनिषदि पिप्पलादसुकेशादीनां ब्रह्मजिगांसूनां तत्र विद्याप्राप्तिः एवञ्च विद्यास्तुतिः आर्थवादत्वेन लिङ्गेन सम्प्रतिपादितः। विशिष्य अस्यामुपनिषदि द्वितीये मन्त्रे पञ्चसंख्यकाः मन्त्राः क्रमेणैव उद्धृताः सन्ति। ये च अर्थवादं समाख्यान्ति।

किञ्च मुण्डकोपनिषदि प्रथममुण्डके द्वितीयखण्डे अष्टमनवममन्त्रयोः अर्थवादः निरूपितः। पुनस्तत्रैव मुण्डकश्रुतौ तृतीयमुण्डके प्रथमखण्डे मन्त्रद्वये अयं अर्थवादः प्रदर्श्यते। तच्चेत्थम् - 'सत्येन लभ्य तपसा ह्येषा आत्मा" इति। एवं क्रमेण 'सत्यमेव जयति नानृतम"ु इत्युभयस्मिन् मन्त्रे अर्थवादः समुपलक्ष्यते। तथा च माण्डोक्योपनिषदि दशममन्त्रे तात्पर्यनिर्णायकमिदं लिङ्गम् मात्रोत्कर्षाद् उभयत्वाद्वोत्कर्षेति। इत्यस्मिन् 'नास्या ब्रह्मवित् कुले भवति" एतस्मिन् मन्त्रे निन्दनेन अर्थवादः द्रष्टुं शक्यः।

किञ्च बृहदारण्यके अज्ञातशत्रुब्रह्मणे शिशुब्रह्मणे वा अर्थवादो दृश्यते। किं बहुना अस्यां उपनिषदि बहुषु मन्त्रेषु तात्पर्यलिङ्गमिदम् उपलभ्यते।तत्र मैत्रयीब्रह्मणे याज्ञवल्क्यमैत्रीसंवादे तता च तृतीयाध्याये कथारूपेण अर्थवादः अन्वेष्टुं शक्यते।

पुनश्च छान्दोग्योपनिषदि चतुर्थाध्याये चतुर्थखण्डप्रभृति नवमखण्डपर्यन्तं विद्यास्तुतये या कता समारब्धा वर्त्तते तस्यां कथायां अर्थवादनामकं लिङ्गमिदं उदाहर्त्तुं शक्यते। एवमेव षष्ठाध्याये सप्तमाध्याये च कथासु समुपलभ्योऽयं अर्थवादः।

एवमस्मिन्नध्याये क्रमेण दशस्वपि उपनिषत्सु विद्यमानानां मन्त्राणामध्ययनपुरस्सरं 'अर्थवादः" इति तात्पर्यलिङ्गमथ सविस्तरं प्रतिपाद्यते।

ईशावास्योपनिषदि अर्थवादः -

अथायं अर्थवादो प्रतिपाद्यते। अर्थवादो नाम प्रकरणप्रतिपाद्यस्य विषयस्य तत्र तत्र प्रशंसनमतिशयगुणख्यापनमित्यर्थः। ईशावास्योपनिषदि तृतीयमन्त्रेऽयं अर्थवादो दृश्यते। यथा हि -

**असूर्या नाम ते लोका अन्धेन तमसावृताः।**
**तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।। ईशा.३.३**

अर्थ: - परमात्मभावमद्वयमपेक्ष्य वर्तमानामसुराणां देवानां लोका सूर्यालोका: इति प्रसिद्ध:। ते च लोका: अन्धेनादर्शनात्मकेन अज्ञानेन तमसावृता:। तानेव लोकान् देवास्ते प्रेत्य त्यक्त्वा देहमभिगच्छन्ति यथाकर्म यथासुखम्। किञ्च येऽविपश्चित: स्वमजानन्तो जना आत्मघातिन: तेऽपि जननमरणचक्रनिपातिता इत्यर्थ:।

एवं हि विद्यावतामुत्कर्षप्रतिपादकादयं मन्त्र: समारभते। असूर्या नाम न सूरा:। असुरा: तेषां लोका: असूर्या:। अत्र देवानामपि आत्मापेक्षावतां लोकान्तरप्राप्ति: श्रूयते। 'क्षीणे पुण्ये मत्र्यलोकं विशन्ति" इत्यनया श्रुत्या देवभावप्रतिपन्नानां मत्र्यलोकाभिसम्प्रतिपत्तिर्भवति। किञ्चात्र -

**स सोमलोके विभूतिमनुभूय पुनरावर्त्तते। (प्रश्न.उ.५/४)**

किञ्चान्यत्र क्वचिद् उद्पुष्टम् - **अथ ये शतं पितृणां जितलोकानामनन्दा: स एक: कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते।**

इत्यत्र निन्दयैवोक्तं असूर्या नाम ते लोका: अत्र विवेकिनामात्मतत्त्वविदां प्रशंसनाय देवादिलोकानामपि हेयतोपोद्वलकं ददाति अन्धेन तमसा वृता त इमे लोका इति।

पुनश्च ये जना: आत्मज्ञानशून्या: निरतिशयस्वप्रकाशचिदैकस्वरूपात्मानमुपेक्षन्ते तेषां निन्दनेनोच्यते। तांस्ते प्रेत्यभिगच्छन्ति इति। अत्रायं पुनराशयो यत् 'ये के च आत्महनो जना:" चेत् चकारेण पूर्वप्रसङ्गसम्पर्क:, ये च देवत्वसम्पन्ना: ये के च अविद्यावन्त: ते क्लेशकर्मविपाकाशयपरामृष्टा: सन्त: श्वशूकरादियोनि अभिसम्प्रयन्ति इति। 'येन यादृशं विहितं प्रतिषिद्धं वा देवतादिज्ञानमनुष्ठितं स तदनुरूपामेव योनिमाप्नोति" इति च आनन्दगिरियतीन्द्रैरुक्तं वचनम्। पुनश्चेह छान्दोग्ये -

'तद्य इह रमणीयचरणा: रमणीयां योनिमापद्येरन्, य इह कपूयचरणा: कपूयां योनिमापद्येरन्"। एवं हि दुर्निष्प्रपतरं लोकान्प्रेत्य तिष्ठन्ति स्वचितकर्मानुशयरूपं फलं भुञ्जते।

अत्रानेन मन्त्रेण अर्थवाद: संसूचित:। तस्यामेवोपनिषदि पूर्वस्मिन्मन्त्रे - 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा:" इत्यत्र।

कर्मानुष्ठानादिकं निष्कामं वासनारहितं भवेत् इत्याशंस्य समा: शतसंवत्सरपर्यन्तं जिजीविषा कर्त्तव्येति मन्त्रनिर्देशात्। अत्र तु कर्माधिकारिण श्रीमत: धनलिप्सो: संसारानुरागिण: कर्मानुष्ठानेन तत्फलभोगराग: जिजीविषा वा सम्भवति, वीतरागाणां ज्ञानिनात्मविदां च सर्वथा तदनुपपत्ते:।

उक्तञ्चोपनिषद्रहस्ये -

**स्वात्मन: स्वस्यरूपस्य तिरस्करणहेतु:।**
**अदर्शनात्मकेनैव चान्धेन तमसावृता:।। (ईशा.रहस्यम्. ४)**

एवमेव साग्निहोत्रकर्मणा: कर्मकुर्वता शतसंवत्सरायु:, त इमे शतसंवत्सरपर्यन्तं कर्मकर्त्तुं प्रभवा: इत्यत्रापि कर्मकर्त्तुं नोपनिषत्केवलं प्रत्युपस्थापयति परं निरासक्तिकं कर्म ईश्वरार्पणबुद्ध्या कर्मणे प्रचोदयति श्रुति:। शतसंवत्सरम् एवञ्च असूर्यानामनरकं नरेण कृतकर्मफलभाक्तवात् तदेव लोकान्तरं प्रत्यभिगमनमर्थवादमात्रम्। तथा च -

**अग्निहोत्रादिकर्मणि व्यवहारान् सदा नर:,**
**कुर्वन् जीवितुमिच्छेद्वै ज्ञातं संवत्सरान् स्वयम्।।**
**प्रकारान्तरं नैवासि न कर्म लिप्यते यथा,**
**ईश्वरार्पणबुद्ध्या तु कर्मकुर्वन्न लिप्यते।।**

यथा किल गीताचार्य: कर्त्तव्यपराङ्मुखतां व्रजन्तं स्वकर्मानुष्ठाय धर्माय च प्रेरयनुदघोषयत् -

**न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।**
**कार्यते द्वादश: कर्म सर्व: प्रकृतिजैर्गुणै:।।**

इति पूर्वोक्तमन्त्रसमर्थनाय। परं विद्यावतां तु कर्मणि प्दरवृत्तिर्नास्ति। शुद्धात्मैक्यविद्यास्तु कर्त्तुत्वादि अध्यासोपमर्दकत्वान्नास्ति कर्मसम्बन्धयोग्यता। किंच

**International Journal of Research in Social Sciences**
Vol. 9, Issue 6, June - 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

यस्मिन्निष्पन्नेऽपि फलस्य व्यवधानं सम्भाव्यते। तस्यैव सहकारिसमुच्चय इष्यते। दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत इत्यादेः। अत्र तु एकत्वमनुपश्यतः यस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत इति श्रुत्वोक्तदिशा आत्मभूतस्य नाम आत्मसम्पन्नस्य तस्य को मोहः कः शोकः इत्येकत्वदर्शनात् समकालमेव मोहादिनिवृत्तिर्भवति।

आत्मानमजानन्तो वर्तमानाः सर्वेऽपि आत्मघातिन इत्युक्त्वावर्थवादः निरूपितः।

सन्दर्भग्रन्थसूची

१. उपनिषद्रहस्य - एकादशोपनिषद- स्व.श्री महात्मा नारायण स्वामी महाराज, प्र.विजयकुमार गोविन्ददास
२. ईशादि नौ उपनिषद् - गीताप्रेस गोरखपुर - २००२
३. मुण्डकोपनिषद् - शाङ्करभाष्यम् - - गीताप्रेस गोरखपुर
४. केनोपनिषद् - गीताप्रेस गोरखपुर
५. श्रीमद्भगवीता - श्रीमत्यारेवत्यासम्पादिता प्रकाशिता च -२००५
६. श्रीमद्भगवीताभाष्यम् - भाष्यार्थप्रकाशाः - श्री वाणीमुद्राक्षरमाला - विजयवाडा
७. उपनिषद्भाष्यवार्त्तिकम् - महेश अनुसन्धान संस्थानम् वाराणसी (१९७९)